षर्व्व,सर्पणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) सर्व्वति। इति दुर्गादासः ॥

षर्षपी, स्त्री, पक्षिविशेषः। यथा,—

"हापुत्त्रिका खञ्जनिका षर्षपो खञ्जनाकृतौ।" इति शब्दरत्नावली ॥

षल, गतौ। इति कविकल्पद्रुमः ॥(भ्वा०-पर०-सक०-सेट्।) सलति। सिषालयिषति। इति दुर्गादासः ॥

षष्टिः,स्त्री,(षड् दशतः परिमाणमस्य। "पङ्क्तिविंशतित्रिंशद्विति।"५।१।५९। इति निपातनात् साधुः।) संख्याविशेषः। षाट इति भाषा। इति ज्योतिषम् ॥ (यथा, मनुः।३।१७७।

"यावतः संस्पृशेदङ्गैर्ब्राह्मणान् शूद्रयाजकः" —

"वौक्षाभ्यो नवतेः काणः षष्टेः श्वित्री शतस्य तु।
पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥")

षष्टिकः,पुं,(षष्टिरात्रेण पच्यन्ते इति।"षष्टिकाः षष्टिरात्रेण पच्यन्ते।"५।१।९०। इति कन्-प्रत्ययेन निपातितः।) धान्यविशेषः। षष्टिरात्रेण पच्यते षाटिया इति स्वामिसुभूतौ। इत्यमरभरतौ ॥ तत्पर्य्यायः। षष्टिशालिः २ षष्टिजः ३ स्निग्धतण्डुलः ४ षष्टिवासरजः ५। अस्य गुणाः।

"गौरो नीलः षष्टिकोऽयं द्विधा स्या-
दाद्यो रुच्यः शीतलो दोषहारी।
बल्यः पथ्यो दीपनो वीर्य्यवृद्धिं
दत्ते तस्मात् किञ्चिदूनो द्वितीयः ॥"
इति राजनिर्घण्टः ॥

षष्टिसंख्याक्रीते, त्रि ॥

षष्टिका,स्त्री, (षष्टिक + स्त्रियां टाप्।)षष्टिकधान्यम्। यथा,—

"हैमन्तिकं सितास्विन्नंधान्यं मुद्गास्तिला यवाः
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका।
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ॥"

इति तिथ्यादितत्त्वे हविष्यान्नप्रकरणीयस्मृतिवचनम् ॥ किञ्च। शरदि षष्टिकाभिः पार्व्वणं नित्यमिति वाचस्पतिमिश्राः ॥

षष्टिक्यं,त्रि,(षष्टिकानां भवनं क्षेत्रम्। षष्टिक + "यवयवकषष्टिकात् यत्" ५।२।३। इति यत्।) षष्टिकधान्योपयुक्तक्षेत्रादि। इत्यमरः।२।९।७॥

षष्टितमः, त्रि,) षष्टि + "षष्ठ्यादेश्चासंख्यादेः।" ५।२।५८। इति तमट्।) षष्टेः पूरणः। इति मुग्धबोधव्याकरणम् ॥

षष्टिधा, व्य, षष्टिप्रकारम्। षष्टिशब्दात् धाच्-प्रत्ययेन निष्पन्नम् ॥

षष्टिमत्तः,पुं, (षष्ट्या वर्षैर्मत्तः।) हस्ती। षष्टिवर्षपर्य्यन्तं वयःपूर्व्वार्द्धं स्थित्या षष्टिमत्तः। इति सारस्वताभिधानं शब्दमाला च ॥

षष्टिलता,स्त्री, भ्रमरमारी। इति राजनिर्घण्टः॥

षष्टिसंवत्सराः, पुं, (षष्टिगुणिताः संवत्सराः।) प्रभवादिषष्टिसंख्यकवर्षम्। यथा,—

अथ षष्टिसंवत्सरगणना।

"शाकेन्द्रकालः पृथगाकृतिघ्नः २२
शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः।
शराद्रिवस्विन्दु १८७५ हृतः सलब्धः
षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः ॥
वर्षवर्ज्जन्तु,यच्छेषं सूर्य्यैः संपूर्य्य खोग्निभिः६०।
हृतव्युत्क्रमतः खाग्निहृतेऽंशे मासकादयः॥"

अस्यार्थः। शाकेन्द्रकालः शकराजाब्दकालः पृथक् द्विस्थः तत्रैव आकृतिघ्नः २२ द्वाविंशत्या पूरितः शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः। शराद्रिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावल्लभ्यं हर्त्तुं शक्नोति तावता हृतः कर्त्तव्यः। सलब्धः पूर्व्वं शकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः षष्ट्यासशेषे पश्चादेषोऽङ्कः पूर्व्ववत् षष्ट्या हृते लब्धस्यावशिष्टे प्रभवादयः। एकावशेषे प्रभवः द्व्याद्यवशिष्टे विभवादिः। वर्षवर्ज्जन्तु यच्छेषं वर्षातिरिक्तं शराद्रिवस्विन्दुहृतावशिष्टं तत् सूर्य्यैर्द्वादशभिः संपूर्य्य खोग्निभिः षष्ट्या हृते व्युत्क्रमत इत्यनेन षष्टिहृतावशिष्टाः अङ्का दण्डाः षष्टिहृतलब्धांशके खाग्निहृते त्रिंशता हृते अवशिष्टा अंशका लब्धा मासाः स्युरिति ॥*॥ प्रभवादिषष्टिवर्षाण्युपक्रम्य।

"आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता।
तृतीया रुद्रदैवत्या श्रेष्ठा मध्याधमा भवेत् ॥"

भविष्यपुराणे।

भैरव उवाच।

"षष्ट्यब्दं कथयाम्यत्र क्रूराः सौम्याश्च ये प्रिये।
संवत्सरफलं मुख्यं प्रभवादौ वरानने ॥
बहुतोयास्तथा मेघाः सर्व्वशस्या च मेदिनी।
बहुक्षीरास्तथा गावो व्याधिरोगविवर्ज्जिताः।
प्रशान्ताः पार्थिवाश्चैव प्रभवे परिकीर्त्तिताः ॥१
सुभिक्षं क्षेममारोग्यं सर्व्वे व्याधिविवर्ज्जिताः।
प्रशान्ता मानवाः सर्व्वे बहुशस्या वसुन्धरा।
हृष्टास्तुष्टा जनाः सर्व्वे विभवे च वरानने ॥२॥
रोगा बहुविधाश्चैव मनुष्या वाजिकुञ्जराः।
सर्व्व एव प्रणश्यन्ति शुक्ले वर्षे वरानने ॥३॥
उन्मत्तञ्च जगत् सर्व्वं धनधान्यसमाकुलम्।
नित्योत्सवः प्रजावृद्धिः प्रमोदे जायते प्रिये ॥४
नीरोगाश्च निराबाधा मानवा विगतद्विषः।
बहुक्षीरास्तथा गावः प्राजापत्ये वरानने ॥५॥
निरातङ्कं जगत् सर्व्वं धनयौवनगर्व्वितम्।
अङ्गिरसि प्रजा सर्व्वा नित्योत्साहा वरानने। ॥६॥
सुभिक्षं क्षेममारोग्यं वर्षाकालं सुशोभनम्।
शस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥७
बहुक्षीरास्तथा गावो धान्यञ्च बलवत्तरम्।
जायन्ते सर्व्वशस्यानि भावे वर्षे वरानने ॥८॥
महार्घं जायते सर्व्वं घृततैलरसादिकम्।
प्रजानाञ्च भवेद्वृद्धिर्यूनि संवत्सरे शुभे ॥९॥
निष्पत्तिः सर्व्वशस्यानां मध्या धातरि कीर्त्तिता
इक्षुक्षीरगुड़ादीनां प्रबलत्वं वरानने ॥१०॥
सुभिक्षं क्षेममारोग्यं कार्पासस्य महार्घता।
लवणं मधु गव्यञ्च ईश्वरे दुर्लभं प्रिये ॥११॥
सुभिक्षं क्षेममारोग्यं प्रशान्ताः पार्थिवाः प्रिये।
तस्करोपहृतं वित्तं बहुधान्ये वरानने ॥१२॥
राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैश्चोपपीड़नम्।
जानीयाद्विग्रहं घोरं प्रमाथिनि वरानने॥१३॥
जायन्ते सर्व्वशस्यानि मेदिनी निरुपद्रवा।
लवणं मधु गव्यञ्च महार्घं विक्रमे प्रिये ॥१४॥
कोद्रवाः शालिमुद्गाश्च शक्तुमाषास्तथैव च।
महार्घं जायते सर्व्वं वृषे च सुरवन्दिते ॥१५॥
चणका मुद्गमाषाश्च अन्यच्च विदलं प्रिये ॥
महार्घं जायते सर्व्वं चित्रभानौ वरानने ॥१६॥
सुभिक्षं क्षेममारोग्यं विश्वञ्च निरुपद्रवम्।
व्यवहारो भवेत् श्रेयान् स्वर्भानौ देवपूजिते॥१७
अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्।
शस्यं भवति सामान्यं दारुणे देववन्दिते ॥१८॥
बहुशस्यानि जायन्ते सर्व्वदेशे सुलोचने।
सौराष्ट्रे नाटदेशे च पार्थिवे नात्र संशयः ॥१९॥
दुर्भिक्षं जायते घोरं सर्व्वोपद्रवसंयुतम्।
अनावृष्टिः समाख्याता व्यये संवत्सरे प्रिये॥२०॥
उद्यतो वर्षणे मेघो जलं नैवोपयच्छति।
महार्घं सर्व्वजिद्वर्षे सर्व्वमेव वरानने ॥२१॥
कोद्रवाः शालिमुद्गाश्च कङ्गुमाषास्तथैव च।
सुलभं जायते सुस्थं जगद्वै सर्व्वधारिणि ॥२२॥
अनग्निप्रबला लोका धान्यौषधिप्रपीड़नम्।
जायते मानुषे कष्टं विरोधिनि न संशयः॥२३॥
सर्व्वाः प्रजाः प्रपीड़्यन्ते व्याधिः शोकश्च जायते
शिरोवक्षोऽक्षिरोगाश्च पापाद्धि विकृते जनाः ॥२४॥
उपद्रुतं जगत् सर्व्वं तस्करैर्मूषिकैः खगैः।
पीड़िताश्च प्रजाः सर्व्वाः देशभङ्गः खरे प्रिये॥२५
सुभिक्षं क्षेममारोग्यं शस्यं भवति शोभनम्।
बहुक्षीरास्तथा गावो नन्दनं नन्दने प्रिये ॥२६॥
अल्पतोयास्तथा मेघा वर्षन्ति खण्डमण्डले।
नश्यन्ति सर्व्वशस्यानि विजये नात्र संशयः॥२७॥
क्षत्त्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़िताः स्ते वरारोहे जये सर्व्वे न संशयः॥२८॥
सरोगश्च तथा देवि दाहज्वरसमन्वितम्।
अभिभूतं जगत् सर्व्वं मन्मथे सुरवन्दिते ॥२९॥
तुषधान्यक्षयो देवि सर्व्वशस्यमहार्घता।
व्यवहाराश्च नश्यन्ति दुर्म्मुखे दुर्म्मुखाः प्रजाः॥३०
पीड़्यन्ते सर्व्वशस्यानि देशे देशे शुचिस्मिते।
हेमलम्बे प्रजाः सर्व्वाः चौर्य्यन्ते नात्र संशयः॥३१
तस्करैः पार्थिवैश्चैव अभिभूतमिदं जगत्।
अर्घो भवति सामान्यो विलम्बे तु भयं महत्॥३२
विषमस्थं जगत् सर्व्वं विरोधे भवसंप्लवम्।
विकारी सर्व्वतोऽपायो मम वाक्यन्तु नान्यथा३३
क्वचिद्वर्षति पर्ज्जन्यो देशे संक्षिप्तमण्डलः।
दुर्भिक्षं सर्व्वरौरवं व्यवहारो विपर्य्ययः ॥३४॥